# अथ श्रीसत्यप्रमोदश्रीमच्चरणैः सङ्गृहीतः

## प्रातःप्रार्थनाक्रमः

ब्राह्मे मुहूर्ते  चोत्थाय वार्युपस्पृश्य माधवः।

दध्यौ प्रसन्नकरणः स्वात्मानं तमसः परम्।

एकं परं ज्योतिरनन्यमद्वयं स्वसंस्थया नित्यनिरस्तकल्मषम्।

ब्रह्माख्यमस्योद्भवनादिहेतुभिः स्वलक्षणैर्लक्षितभावनिर्वृतम् ।।

अंतस्सरस्स्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरम्बुजहस्त आर्तः

आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवःश्रवणमङ्गलनामधेय ।

स्मृत्वा हरिस्तमरणार्थिनमप्रमेयो चक्रायुधः पतगराजभुजाधिरूढः

चक्रेण नक्रवदनं विनिपाट्य तस्मात् हस्ते प्रगृह्य भगवान् कृपयोज्जहार।।

यदनुग्रहतस्सर्वदिग्जयो भवतीप्सितः नमाम्यहं दिग्विजयरामं पूर्णधियार्चितम्

वन्दे वन्देतरानन्ददशस्यंदननन्दनं शुभलीलजगन्मूलरामं पूर्णधियार्चितम्।।

सीतां जनकसञ्जातां वातांशानन्दसन्नुताम्।

ख्यातां वेदैर्गुणव्रातां गीतां वन्दे हरौ रताम्।।

वेदव्यास गुणावास श्रुतिस्तोमविकासक।

पञ्चरूप नमामि त्वां पूर्मप्रज्ञकरार्चित।।

अर्वास्यशर्वगुर्वात्मशक्रपूर्वसुपर्वभिः

वन्द्य श्रीधर भो लक्ष्मीनारायण नमोऽस्तु ते।।

पयोम्बुवच्चेत्तत्रापीत्युक्तं साधयितुं पयः

दधिकुर्वन्तमनिशं सेवेऽहं दधिवामनम्।।

नाञ्चनं सञ्चकाराहं पञ्चबाणेन वञ्चितः

किञ्चांहसां सञ्चयोऽस्ति पाहि पञ्चसुदर्शनी।।

चक्रांकितसुकायेष्टप्रदचक्राङ्कितानि माम्।

पञ्च सिञ्चन्तु करुणासुधासारैरचञ्चलैः।।

दक्षिणा वर्तते यस्मिन् लक्षणान्वितवारिजे।

रक्षणार्थमहं सेवे दक्षिणावर्तवारिजम्।।

काम्यान्यकर्मगम्यश्रीस्वाम्यर्चार्चनसाधनम्।

सम्यग्भक्त्या प्रणम्याऽलं स्तौम्यहं रम्यवारिजम्।।

हरेर्निवासस्थानत्वात् अर्थाक्षयकरत्वतः

अक्षयाह्वय हे पात्र वन्देऽहं त्वां निरन्तरम्।।

पुष्कलैर्नः पुष्करद शुष्कान्यपवनायितम्

रामनिष्कमहं सेवे पुष्कराद्याह्वयांकितम्।।

मन्तुमन्तं कन्तुवशं हन्तुं दशमुखं खरम्

प्रवीणौ रामबाणौ तौ प्रणौम्यघनिकृन्तये।।

शिष्टश्रीसत्यबोधेष्टप्रदाष्टाविंशतिस्तुतिः

सत्यसंधेन रचिता तरङ्गयतु मङ्गलम्।।

लक्ष्मीनारायणश्रीहयमुखदधिकृद्वामनश्रीधरेषु

व्याशाशाजेतृरामाऽवनिजनिसहितश्रीजगन्मूलरामान्।

वन्दे श्रीरामनिष्कामितमतिनुतसत्पञ्चसौदर्शनाख्यान्

पञ्चार्यैकद्विबाणाम्बुजयुगसहितं ह्यक्षयाख्यं च पात्रम्॥

रामाभिधं वंशपतिं श्रीमाधवमुनीडितम्।

उमाधवमुखाराध्यं श्रीमाधवमहं भजे॥

अन्नदातः प्रसन्नश्रीविठ्ठलाक्षोभ्यसन्नुत।

यन्न वेत्ता खिन्नचित्तापन्नस्त्वत्पद्यतोऽव माम्॥

नारायणं सुरगुरुं जगदेकनाथं भक्तप्रियं सकललोकनमस्कृतं च।

त्रैगुण्यवर्जितमजं विभुमाद्यमीशं वन्दे भवघ्नममरासुरसिद्धवन्द्यम्॥

जयति हरिरचिन्त्यः सर्वदेवैकवन्द्यः परमगुरुरभीष्टावाप्तिदः सज्जनानाम्।

निखिलगुणगणार्णो नित्यनिर्मुक्तदोषः सरसिजनयनोऽसौ श्रीपतिर्मानदो नः॥

जयत्यजोखण्डगुणोरुमण्डलः सदोदितज्ञानमरीचिमाली।

स्वभक्तहार्दोचतमोनिहन्ता व्यासावतारो हरिरात्मभास्करः॥

जयत्यजोऽक्षीणसुखात्मबिम्बः स्वैश्वर्यकान्तिप्रततः सदोदितः।

स्वपक्षसन्तापदुरिष्टहन्ता रामावतारो हरिरीशचन्द्रमाः॥

जयत्यसंख्योरुबलाम्बुपूरो गुणोच्चरत्नाकर आत्मवैभवः।
सदा सदात्मज्ञनदीभिराप्यः कृष्णावतारो हरिरेक सागरः॥
सकलसुगुणपात्रं सर्वदोषैकजेत्रं सुमतिसुगतिदात्रं सुष्टुसुज्ञानानन्दम्।
निखिलजनिजनित्रं नित्यतुष्टैकवेत्रं नवनवसुचरित्रं नौमि लक्ष्मीकलत्रम्॥
सुखमुखगुणबिम्बः साधुमार्गावलम्बः सुमतिजलजमोदः भूषितान्यप्रमोदः।
भुवनविततमोहध्वान्तविध्वंसगेहो दिशतु दृशमभीष्टां व्याससूर्यस्स्वनिष्ठाम्॥
गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः
पाणिस्पर्शाक्षमाभ्यां मृजितपतिरुजो यो हरीन्द्रानुजाभ्याम्।
वैरूप्यात् शूर्पणख्याः प्रियविरहरुषा रूपितभ्रूविजृम्भः
श्रुत्वा निर्बद्धसेतुः खलदवदहनः कोसलेन्द्रोऽवतीर्णः॥
निर्मथ्योग्रभवार्णवे निजमनोऽभीष्टं दिशामीति यः
सम्यज्ज्ञापयितुं करेणविलसन्मन्थानमन्येन च।
रम्यं दामदधन्महेशरजतग्रामश्रियोऽलङ्कृतिः
कर्मंदीश्वरभक्तिबन्धनवशः प्रीतोऽस्तु कृष्णप्रभुः॥
सच्छास्त्रोदितवर्त्मना पदमिदं ध्यायन्मदङ्काङ्कितो
मन्मन्त्रं जप शास्त्रसंपदमथो दास्यामि भाग्यैः सह।
तत्तत्त्वान्यपि बोधयामि तदनु प्राप्यो मदङ्घ्रिर्भवेदि
त्याघोषयतीव यः करचयैः तं वाजिवक्रं भजे॥
नरसिंहोऽखिलाज्ञानमतध्वान्तदिवाकरः।
जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः॥
सिञ्जन्नूपुरुशोभिपादकमलां मन्दस्मितोद्यन्मुखीम्
कञ्जाक्षीं कुचभारभीरुविलसन्मध्यां क्वणत्कङ्कणाम्।
शंभ्वाद्यैः परिसेवितां सुवसनां जांबूनदालङ्कृताम्
अम्बां तां प्रणतोऽस्मि कृष्णरमणीं लम्बालकां रुक्मिणीम्॥
यद्वाग्विस्तररश्मिभिर्जगदिदं सन्मार्गमालम्बितम्
सत्सिद्धान्तपदारविन्दनिवहा विस्तारमासादिताः।
दुस्सिद्धांतमहांधकारनिकरा देशांतमुल्लङ्घिताः

सोऽयं मध्वदिवाकरो भवतु सज्ज्ञानप्रकाशाय मे॥

यो वेदेशमताब्धिवृद्धिकरणे पूर्णेंदुवृन्दायितः
मित्थ्यावादिकरीन्द्रदारणविधौ योऽसौ मृगेन्द्रायितः।
रुद्रेन्द्रादिमनः कुशेशयमुदां दाने दिनेशायितः
तं कालीसुतपादपद्मनिरतं मध्वं तमीड्यं नुमः॥

वणि ते करवाण्यम्ब चरणौ हृदि सर्वदा।
मद्वाक्यसरणिर्भूयात् श्रीमदाचार्यभावगा॥

फणिगणवरभूषः पार्वतीश्लाघ्यवेषः
खलजनकृतरोषः खण्डितात्मीयदोषः।
सदरुणगिरिवासः शक्रसूर्याद्यधीषः
परिहृतभवपाशः पातु मां पार्वतीशः॥

सत्सूत्रान्वितमध्वभाष्यविलसद्गांडीवसंयोजितैः
सन्मानेषुभिरर्दयन् कुसमयप्रत्यर्थिदुस्स्यन्दनान्।
श्रीकृष्णेरितवेदवाजिनियतश्रीमध्वशास्त्रोल्लसद्
दिव्यस्यन्दनसंस्थितोजयमुनीशयाख्यार्जुनस्स्यान्मुदे॥

श्रीमन्मध्वकृतान्तसङ्गतकृतीः यन्निर्मितात्यद्भुताः
सर्वेऽधीत्य सतीर्हि तत्प्रवचनासक्त्या रमन्तेऽनिशम्।
सोऽसौ श्रीजयतीर्थपूज्यचरणः स्वग्रन्थसक्तिं परां
अस्मिन्जन्मनि यावदायुरखिलान् विघ्नान् निवार्यादिशेत्॥

सच्छास्त्रामलभावबोधकिरणैः संवर्धयन्मध्वसत्
सिद्धान्ताब्धिमनन्तशिष्यकुमुदव्रातं विकासं नयन्।
उद्भूतो रघुवर्यतीर्थजलधेर्तापत्रयं त्रासयन्
यस्तं नौमि रघूत्तमाख्यशशिनं श्रीविष्णुपादाश्रयम्॥

श्रीमद्रामगिरीन्द्रपादनिरतं विद्रावयन्तं दिशो
दुर्वादीन्द्रमहामृगान्निगमसद्व्याख्यालसन्नादतः।
दुश्शास्त्रेभकुतर्ककुम्भदलनप्रौढात्मविद्यानखं
वेदव्यासमृगेन्द्रराजमधिकं वन्देऽनिशं मद्गुरुम्॥

ज्ञानवैराग्यभक्त्यादिकल्याणगुणशालिनः।
लक्ष्मीनारायणमुनीन्वन्दे विद्यागुरूनमम॥
वेदान्ताब्धिममन्दबोधगिरिणा सद्ब्रह्मसूत्राहिना
दुस्तर्केतरदानवामरगणैः सम्मथ्य यो लब्धवान्।
सन्न्यायामृतचन्द्रिके युधि तथा तर्केऽकरोत्ताण्डवं
सोऽयं व्यासयतीन्द्रपूज्यचरणो नित्यं भवेन्मे मुदे॥
कामधेनुर्यथा पूर्वं सर्वाभीष्टफलप्रदा।
तथा कलौ वादिराजश्रीपादोऽभीष्टदस्सताम्॥
श्रीमत्सुधाद्भुताम्बोधिविक्रीडनविचक्षणान्।
वाक्यार्थचन्द्रिकाकारान् विद्याधीशगुरून् भजे॥
सत्यनाथगुरुः पातु यो धीरो नवचन्द्रिकां।
नवामृतगदातीर्थताण्डवानि व्यचीक्लृपत्॥
श्रीमन्मध्वमतोदयाद्रिशिखरादुद्यन्नविद्यातमो
नाशं सङ्कलयन् कुवादिविपिनं ज्ञानांशुभिः शोषयन्।
संख्यावज्जनकञ्जकुड्मलगणान् सन्तोषयन् सन्ततं
सोऽयं श्रीगुरुराघवेन्द्रतरणिः कुर्याज्जगन्मङ्गलम्॥
यः क्षान्तौ भवति स्वयंभवति भूजाजानिसंसेवने
गांभीर्येऽम्बुधयत्यघौघहरणे गङ्गाति धीशोधने।
शेषत्यर्थविवेचने गुरवति श्रीरामति प्राभवे
तं वन्दे मदभीष्टसन्ततिकरं सत्यप्रियाख्यं गुरुम्॥
श्रीसत्यबोधो निजकामधेनुः मायातमःखण्डनचण्डभानुः।
दुरन्तपापप्रदहे कृशानुः देयान्ममेष्टं गुरुराजसूनुः॥
विष्णोपदश्रिद्व्रोव्रातैः स्वान्तध्वान्तदिवाकरः।
श्रीसत्यसन्धसूर्योऽयं भासतां नो हृदम्बरे॥
नाभूत्सौधरसं पिबन्नपि सदा मत्तो मनाक्षोकवत्
श्रीशाराधनतत्परो सुविरतः संस्तूयमानो बुधैः।
धत्ते दण्डमथापि शान्तिविभवः रक्तोऽपि शुभ्रो जने

सत्यज्ञानमुनीश्वरो विजयतां ज्ञानाय तान्प्रार्थये॥

आरूढस्सहसा यतीन्द्रपदवीं गत्वा च वाराणसीं
तत्रत्यान् कुमतप्रचारनिरतान् अद्वैतदिग्दन्तिनः।
प्रौढार्थैः वचनैस्सुयुक्तिखचितैः संभीषयन् मोदयन्
सत्यध्यानसुकेसरी विजयते पादाश्रितः श्रीपतेः॥

प्रावोचद्योधिकं न्यायसुधावाक्यार्थचन्द्रिकाम्।
सत्यप्रज्ञगुरुर्दद्यात् प्रज्ञां वैदान्तिकीं सदा॥

बन्धुस्त्वं गुरुरिष्टदैवतमिति त्वत्पादपङ्केरुहं
प्राप्तं मां परिपालयेति सततं याचे निबद्धाञ्जलिः।
चित्तं मद्गुणदोषचिन्तनविधौ नूनं मनाङ्माकृथाः
सत्याभिज्ञगुरो त्वदङ्घ्रियुगलं हित्वा न मे सद्गतिः॥

सत्याभिज्ञकराब्जोत्थान् पञ्चाशद्वर्षपूजकान्।
सत्यप्रमोदतीर्थार्यान् नौमि न्यायसुधारतान्॥

वेदेशमुनिसत्पादसेवासंप्राप्तवैभवान्।
यादवार्यान् वरसुधाटीकाकारान् वयं नुमः॥

पृथ्वीमण्डलमध्यस्थाः पूर्णबोधमतानुगाः।
वैष्णवा विष्णुहृदयास्तान् नमस्ये गुरून्मम॥

अयं सर्वेष्टदाता मे सर्वारिष्टनिवारकः।
सर्वोत्कृष्टोऽयमेवैकः तदीयोऽहं स मे पतिः॥

नमोऽस्तु तात्विका देवाः विष्णुभक्तिपरायणाः।
धर्ममार्गे प्रेरयन्तु भवन्तः सर्व एव हि॥

त्रैलोक्यचैतन्यमयादिदेव श्रीनाथविष्णो भवदाज्ञयैव।
प्रातःसमुत्थाय तवप्रियार्थं संसारयात्रामनुवर्तयिष्ये॥

स्वामी त्वं नृहरे त्वानुचरणा प्राणा शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरः
यद्यत्कर्म करोमि तत्तदखिलं विष्णो तवाराधनम्॥

संसारयात्रामनुवर्तमानः त्वदाज्ञया श्रीनृहरेऽन्तरात्मन्।
स्वर्धातिरस्कारकलिप्रमादध्यायन्नुमामाभिभवेद्धिकृष्ण॥

जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः।
कृष्णेन देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा वहामि॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥

अक्षयं कर्म यस्मिन् परे स्वर्पितं प्रक्षयं यान्ति दुःखानि यन्नामतः
अक्षयो योऽजरस्सर्वदैवामृतः कुक्षिगं यस्य विश्वं सदाजादिकं
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डनम्॥

इति श्रीसत्यप्रमोदश्रीमच्चरणैः सङ्ग्रहीतः प्रातःप्रार्थनाक्रमः